# छान्दोयदिशा-उद्गीथोङ्कारोपासनविमर्शः

**प्रो० सुधांशुशेखर शास्त्री**

वेदान्तोनामाध्यात्मशास्त्रम् "अध्यात्मविद्या विद्यानाम्" इति विश्वगुरूणाऽऽकारणबन्धुनोदघोष्यमाण-वैभवम्। प्रवर्तन्ते हि सर्वाणि शास्त्राणि धर्मार्थकाममोक्षाख्येषु चतुर्विध पुरुषार्थेषु कमपि पुरुषार्थार्थिनञ्च कञ्चिल्लक्ष्यीकृत्य। तत्र वेदान्तशास्त्रं परमपुरुषार्थं मोक्षं तत्प्रेप्स्वाधिकारिविशेषञ्चाश्रित्यैव प्रवर्तमानं दृश्यते। वेदान्तशास्त्रस्य मूलभूतं स्वरूपं रहस्यविद्यानां प्रतिपादनादुपनिषच्छब्देन व्यपदिश्यते। उपेत्य निश्चयेन साद्यते इत्युपनिषत्। उपनिपूर्वकात् षद्लृ विशरणगत्यवसादनेषु इत्यस्माद्धातो: सम्पदादित्वात् कर्मणि क्विप्। "सदिरप्रते:" इति षत्त्वम् इत्युपनिषच्छब्दो निष्पद्यते। तदर्थश्च ब्रह्मविद्या सहेतुकस्य प्रपञ्चस्यावसादनात्। तादर्थ्याच्च ग्रन्थेन्युपनिषदुच्यते। तदुक्तं श्रीमद्भगवत्पादाचार्यै:—

"उपशब्दो हि सामीप्यमाह। तच्चासति सङ्कोचके प्रतीचि पर्यवस्यति। निशब्दश्च निश्चयार्थ:। तस्मादैकात्म्यं निश्चितम्। तद्विद्या सहेतुं संसारं सादयतीत्युपनिषदुच्यते" (बृ० भा०) "सदेधातोर्विशरणगत्यवसादनार्थस्योपनि-पूर्वस्य क्विप्प्रत्ययान्तस्य रूपमुपनिषदिति।" ये मुमुक्षवो दृष्टानुश्रविकाविषयावितृष्णा: सन्त उपनिषच्छब्दवाच्यं वक्ष्यमाणलक्षणां विद्यामुपसद्योपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादे: संसारबीजस्य विशरणात् हिंसनात् विनाशादित्यनेनाथयोगेन विद्योपनिषदुच्यते। पूर्वोक्तविशेषणान्मुमुक्षून् वा परं ब्रह्म गमयतीति ब्रह्मगमयितृत्वेन योगात् ब्रह्मविद्योपनिषत्। ननु चोपनिषच्छब्देनाध्येतारो ग्रन्थमप्यभिलपन्ति उपनिषदमधीमहेऽध्ययपयाम इति च। नैष: दोष:, अविद्यादिसंसार, संसारहेतुविशरणादे: सदि धात्वर्थस्य ग्रन्थमात्रेऽसंभवात्, विद्यायाञ्च संभवात्। ग्रन्थस्यापि तादर्थ्येन तच्छब्दत्वोपपते:। आयुर्वैघृतमित्यादिवत्। तस्माद् विद्यायां मुख्यया वृत्त्या उपनिषच्छब्दो वर्तते, ग्रन्थे तु भक्त्येति। एवमुपनिषन्निर्वचनेनैव विशिष्टोऽधिकारी विद्यायामुक्त:। विषयश्च विशिष्ट उक्तो विद्याया: परं ब्रह्म प्रत्यगात्मभूतम्। प्रयोजनम् चास्या उपनिषद आत्यन्तिकी संसारनिवृत्ति- ब्रह्मप्राप्तिलक्षणा। सम्बन्धश्चैवंभूत प्रयोजनेनोक्त:" (कठ० उ०) इति।

तैत्तिरीयोपनिषद्दीपिकारेणापि उपनिषत्सर्वकारणं सर्वाधारभूतं निरतिशयानन्दैकस्वभावं निर्भे-दमपगतसमस्तप्रपञ्चं ब्रह्मास्मीति सामीप्येन निरतां गमयित्वाऽहं ममादि बन्धनानि शिथिलीकृत्याविद्यां सकार्यां ससंस्कारां सादयति विनाशयतीत्युपनिषद् ब्रह्मविद्या, प्रतिपादको ग्रन्थो वोपनिषत्" इति।

श्रीमत्सुरेश्वराचार्यैर्विस्पष्टमिदमीरितम्

अत्र चोपनिषच्छब्दो ब्रह्मविधैक गोचर:।
तत्रैव चास्य सद्भावदभिधार्थस्य तत्कुत:।।

तत्रैव=ब्रह्मविद्यायामेव।

उपोपसर्ग: सामीप्ये तत्प्रतीचि समाप्यते।
त्रिविधस्य सदर्थस्य निशब्दोऽपि विशेषणम्।।

उपनीयममात्मानं ब्रह्मायास्तद्वयं यतः।
निहन्त्याविद्यां तज्जं च तस्मादुपनिषद्भवेत्।।

निहत्यानर्थमूलं स्वाविद्यां प्रत्यक्तया परम्।
गमयत्यस्तसंभेदमतो वोपनिषद्भवेत्।।

प्रवृत्ति हेतून्निःशेषां स्तन्मूलोच्छेदकत्वतः।
यतोऽवसादयेद्विद्या तस्मादुपनिषन्मता।।

यथोक्ताविद्याबोधित्वाद्ग्रन्थोपि तदभेदतः।
भवेदुपनिषन्नामालाङ्गलं जीवनं यथा।।

(बृ.भा.वा. **38**)

उपनिषच्छब्दार्थं प्रतिपादयता भगवता भाष्यकृता ब्रह्मविद्यात्मकस्य वेदान्तस्यानुबन्ध चतुष्टयमपि निर्दिष्टम्। तत्र विशिष्टाधिकारिशब्देन नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमदमोपरतितितिक्षा श्रद्धासमाधानानि षट्सम्पत्तिर्मुमुक्षुत्वञ्चेति साधन चतुष्टयसम्पन्नः प्रमाता संसूचितः।

प्रत्यग्चैतन्याभिन्नं परं ब्रह्मैव विशिष्टो विषयः।वेदान्ताभिमतः मोक्ष एव प्रयोजनम्, एवमेव सम्बन्धोऽपि।

यद्यप्यद्यत्वे क्वचिदष्टाविंशतिः कुत्रचित्द्वात्रिंशत्, कुत्रचिदेकसप्ततिः क्वचनाष्टोत्तरं शतम्कुत्रचित्ततोऽप्याधिका उपनिषदः प्रकाशिता दृश्यन्ते। तथापि तासु सर्वास्वपि मुख्यतया दशोपनिषदो भवन्ति। ताश्चैताः

ईशकेनकठप्रश्नमुण्डकमाण्डूक्यतित्तिरिः ।
ऐतरेयञ्च छान्दोग्यं वृहदारण्यकं दश। इति ।
एतास्वेव श्रीमद्भगवत्पादीयं भाष्यमपि।

तत्र ग्रन्थदृष्ट्या कर्मोपास्तिज्ञानकाण्डत्रयात्मकस्य वेदस्य ज्ञानकाण्डात्मको भागः उपनिषच्छब्देन व्यवह्रियते। अतः सामवेदीयं ज्ञानकाण्डं छान्दोग्योपनिषदिति प्रसिद्धम्।

अस्या उपनिषदः प्राक्पूर्वास्मिन्काण्डे कर्म प्रतिपादितम्। तच्च द्विविधं विहितं निषिद्धञ्च। तत्र विहितमपि द्विविधं तत्तद्देवतोपासनसहितं तद्रहितञ्च । तत्र देवतोपासनादिसहितेन कृतेन कर्मणा ब्रह्मलोकप्राप्तिर्भवति, तत्समुच्चितेन च कर्मणा चन्द्रलोकादिप्राप्ति र्जायते। निषिद्धेन कर्मणाऽधोगतिः तिर्यगादिक्षुद्रजन्तुप्राप्तिलक्षणा भवति। अतः केनापि कर्ममार्गेण न परमपुरुषार्थप्राप्तिः सम्भवतीति मुमुक्षूणां मोक्षमार्गप्रदर्शनार्थमुपनिषद आरम्भ। तदुक्तं भाष्यकृता"नचाद्वैतात्मविज्ञानादन्यत्रात्यन्तिकी निःश्रेयसप्राप्तिः" वक्ष्यति हि "अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति, विपर्यये च स स्वराड्भवति" इति। "तस्मादविद्यादिदोषवत एव कर्माणि विधीयन्ते, नाद्वैतज्ञानवतः" अतएव हि वक्ष्यति "सर्व एते पुण्यलोका भवन्ति। ब्रह्मसंस्थोऽमृतत्वमेति" इति ।

यद्यपि "मनोमय: प्राणशरीर:" इत्याद्युपासनानि अभ्युदयस्य साधनानि भवन्ति। तथाप्यत्र ज्ञानकाण्डे प्रतिपादितानां कर्माङ्गभूतानां कर्मफलगतातिशयफलानामुद्गीथाद्युपासनानां कैवल्यसन्निहित क्रममुक्तिफलकत्व-मप्यस्ति। विषयोऽप्येतेषामद्वैतान्निष्प्रपञ्चादीषदविकृतं सगुणं ब्रह्मैव।

किञ्चोपनिषत्पदवेदनीयत्वं यथा ब्रह्मविद्यायां तथैवोपासनायामपि विद्यत एव। एवं यथा ब्रह्मविद्यायामनोवृत्तिरूपत्वं तथैवोपासनायामापि मनोवृत्तिरूपत्वमेव। तथा च फलविषयस्वरूप प्रतिपादक-दृष्ट्याऽऽस्ति किञ्चित्साम्यमुपासनानामात्मज्ञानेन साकमिति ब्रह्मविद्याप्रकरणेऽपि तेषामुपन्यास औचित्यचुम्बित एव।

नन्वात्मज्ञानम् आत्मन:स्वरूपभूतमेवज्ञानं तदेव च फलमिति किमर्थं वृत्तिरूपत्वं तस्येति चेत्, सत्यम्, आत्मज्ञानस्य द्वैविध्यात्। तथाहि द्विविधं ह्यात्मज्ञानं आत्मविषयकं ज्ञानमेकम्, आत्मस्वरूपभूतं ज्ञानञ्चापरम्। तत्र वेदान्तसिद्धान्ते मोक्षदशायां न किञ्चिन्नूतनं प्रापणीयं भवति, आत्मस्वरूपात्मकस्य ज्ञानस्य फलात्मकस्योत्पाद्यादि-चतुर्विधद्रव्यविलक्षणस्य नित्यतया प्रागपि सिद्धत्वात्। अत एव न तत्र किञ्चित्साधनमप्यपेक्षते। केवलं सकार्याया ससंस्काराया अविद्याया निवृत्तौ बद्धत्वभ्रमनिवृत्तौ नित्यशुद्धबुद्धस्वस्वरूपे आत्मन्यवस्थानमेव भवति। तदेव च मुख्य मोक्ष:। किन्त्वास्ति तत्र स्वस्वरूपावस्थाने प्रतिबन्धिका बद्धत्वभ्रमजनिका काचिदनिर्वचनीया अविद्याख्या शक्ति:। तस्यां विद्यमानायां बद्धत्वभ्रमवशान्न स्वस्वरूपावस्थिति:। अतस्तदर्थं तस्या निवृत्तिरेव आवश्यिकी। अतएव—

"अविद्यास्तमयो मोक्ष: सा च बन्ध उदाहृत:"<br>
"निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षित:"

इत्यादिना वार्तिककृद्भिरविद्यास्तमस्यैव मोक्षत्वं प्रतिपादितम्।

तस्याश्चाविद्याया निवृत्तिर्न आत्मस्वरूपभूतेन ज्ञानेन, तेन सह तस्या अविरोधात्। चिद्रूपं हि ब्रह्म सर्वस्यापि साधकं प्रकाशकम्, न कस्यापि निवर्तकम्। "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति इत्यादि श्रुते:। अतोऽविद्याया अपि साधकं तदेव, अन्यथा अविद्याया सिद्धिरेव न स्यात्, चिदात्मनो भिन्नस्य कस्यापि प्रकाशकाभावात्। अत एवोक्तं वार्तिककारेण

यत्प्रसादादाविद्यादि सिध्यतीव दिवानिशम्।<br>
तमप्यपहृतेऽविद्या नाज्ञानस्यास्ति दुष्करम्" इति

तथा च तस्या निवृत्त्यर्थमात्मविषयकं ज्ञानं स्वीध्यिते। तच्चान्त:परिणामरूपमखण्डाकारवृत्त्यात्मकम्। तदुक्तं मिश्रै: "न चायमनुभवो ब्रह्मस्वभावो येन न जन्यते, अपित्वन्त: करणस्यैव वृत्तिभेदो ब्रह्मविषय:" (ब्र.शा.भा. भामत्याम्1/1,1) इति।

तत्रेदं बोध्यम् यथा भगवतो भास्करस्य रश्मि: स्वसम्बद्धं सर्वं शुभाशुभं चराचरात्मकं जगत्भासयति साधयति च, न दहति, किन्तु स एव रश्मिर्यदा सूर्यकान्तमणौ तत्सदृशदर्पणविशेषे समारूढो भवति तदा स्वसम्बन्धं वस्तु दहति भस्मसात्करोति। तथैवेदं चिद्रूपं ब्रह्म (आत्मस्वरूपभूतं ज्ञानम्) सर्वं भासयति साधयति चाविद्यां तत्कार्यञ्च जगत्, किन्तु तदेवात्मस्वरूपं ज्ञानं यदाऽऽखण्डाकारावृत्त्यारूढं भवति तदा वृत्त्यवच्छिन्नं सदविद्यादिकं सर्वमुच्छिनत्ति भस्मसात्करोति। यथाह भगवान्श्रीकृष्ण:

यथैधांसि समिद्धोऽग्नि र्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्नि: सर्वकर्माणि भस्मसात्कुरुते तथा।। (गीता. 4/37)

तस्मादुपासनामिवात्मज्ञानमपि मनोवृत्तिरूपम्इति ।

ननु तर्हि अद्वैतात्मज्ञानस्योपासनानाञ्च को विशेष इति चेत् अत्रोच्यते, यथा प्रकाशादिनाजायमानं रज्जुस्वरूपज्ञानं रज्वादौ समारोपितस्य सर्पादिज्ञानस्य निवर्तकम्, तथैवद्वैतात्मज्ञानमात्मनि समारोपितस्य कर्त्रादिकारकक्रियाफलभेदाविज्ञानस्य निवर्तकम्। उपासनन्तु न साक्षात्तन्निवर्तकं तत्र तस्य सामर्थ्याभावात्।

तदुक्तं स्वाराज्यसिद्धौ—

आविद्यो ह्येष बन्धो विरमति न विना वेदनं कर्मजालै:
मालोद्भूतोऽहिरस्तं व्रजति किमु नमस्कारमन्त्रौषधाद्यै:।।
एवं निश्चित्य नागस्त्वचमिव विधिना कर्मबन्धं विधूय।
ज्ञानोपाये गुरुश्रीचरणमधिगत: सेवमानो यतेत।।इति।।

उपासनन्तु "मनो ब्रह्मेत्युपासीत इत्यादि शास्त्रसमर्थितं मन:प्रभृतिकिञ्चिदालम्बनमादाय तस्मिं समानजातीय प्रत्ययसन्तानकरणस्वरूपं वर्तते"। अतस्तादृशमुपासनं मध्ये विच्छिद्य विच्छिद्य ध्यायिनोऽपि सम्भवति।

तान्येतान्युपासनानि परमेश्वरार्पणबुद्धयाऽऽनुष्ठितानि चित्तशुद्धिद्वारा वस्तुतत्वप्रकाशकतया ज्ञानोत्पत्तौ कारणानि अद्वैतसाक्षात्करोपकारकाणि च भवन्ति। सुसाध्यानि च तानि मन्दाधिकारिभिरपि साकारवस्तुविषयत्वात्। किन्तु मन्दाधिकारिभि: प्राकृतै: पुरुषै: कर्मभ्यासस्यानादिवासनया दृढ़ीकृतत्वात्कर्माणि सर्वथा परित्यज्य केवलमन्युपासनानि कर्तुमशक्यानि सुगमतयेति ब्रह्मविद्याया: समारम्भ एव कर्माङ्गभूतमुद्गीथोपासनमुपन्यस्तम्।

सामवेदीयतवलकार शाखीया छान्दोग्योपनिषदष्टाध्यायी। तत्र सर्वप्रथमम्"ओमित्येतदक्षरमुपासीत" इत्यादिनाउद्गीथोपासनं विहितम्। ओमित्येतदक्षरं सर्वेष्वपि वेदेष्वाभिव्याप्तम्। उपनिषत्सु प्रणवस्य रूपद्वयमुपलभ्यते।एकं साध्यरूपमपरं साधनरूपम्। यद्यप्योमिति परमात्मन: प्रियतममभिधानम्, तथाप्याभिधाना-भिधेययोस्तादात्म्यतया एकत्वेन परमात्मरूपतैवास्य।किन्त्वभिधानाभिधेययोरेकत्वेऽपि क्वचिच्चाभिधेयप्राधान्येन। यत्राभिधेयप्राधान्येन समुल्लेखस्तत्रास्य परमात्मरूपतया साध्यं रूपम्। यद्यपि परं ब्रह्म न साध्यम् अपितु परिनिष्ठितस्वरूपत्वात्सिद्धस्वरूपमेव। तथापि प्रणवस्य साधनरूपापेक्षया तत्र साध्यत्वं समारोप्य तद्व्यवहार:।

तथाचास्याभिधेयप्राधान्येन निर्दिशो यथा ओमिति ब्रह्म (तैत्ति.1/8/1) ओङ्कार आत्मैव" (माण्डू. 12) ओङ्कार एवेदं सर्वम्" (छा.उ. 2/23/4) ओमिति सत्यम्" (ऐत. 3/6/4) "सर्वमोङ्कार एव" (म. 1) इत्यादौ। एवं यत्राभिधानप्राधान्येन निर्देशस्तत्र साधनरूपम्। यथा "ओंकारं पादशो ज्ञात्वा न किञ्चिदपि चिन्तयेत्" (आगम 24) "ओंकारं यो न जानाति ब्राह्मणो न भवेत्तु स: (ध्या.वि.14) "ओमिति सामानि गायन्ति" (तैत्ति. 1/8/1) "ओमित्याश्रवयति" (छा. 1/1/9) ओमित्युद्गायति। (छा. 1/1/1)+1/4/1+1/1/9) "ओमित्यात्मानं युञ्जीत" (महाना. 17/15) "एतदालम्बनम्" ओमित्येतत्" एतद्वै सत्यकाम" इत्यादौ ।

अपि च भूतं भवद्भविष्यदिति सर्वमोङ्कार एवेत्यनेन कालत्रयपरिच्छेद्यस्य "यच्चान्यत्त्रिकालातीतं तदप्योंकार एव" (मा.उ. 1) इत्यनेन कालापरिच्छिन्नस्याव्याकृतस्य साभासस्याज्ञानस्य ओङ्काररूपत्वं प्रतिपादितम्। अव्याकृतं सामभासमज्ञानमनिर्वचनीयं हि न कालेन परिच्छेद्यते, कालं प्रत्यपि कारणात्वात्। पश्चाद्भाविनः कार्यस्य च न प्राग्भाविकारणपरिच्छेदकत्वं सम्भवति। ओारस्य सर्वात्मकत्वं प्रतिपाद्य "सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म" (मा. 2) इत्यनेन सर्वात्मकस्य तस्य ब्रह्मरूपत्वं ब्रह्मात्मनोरैक्यञ्चापि निर्दिष्टम्। एतेनोङ्कारस्य ब्रह्मात्मैक्यप्रतिपत्तये मुख्यं साधनत्वं ध्वनितम्।

अतएव अकारोकारमकारात्मकस्योंकारमात्रात्रयस्य प्रत्यगात्मरूपत्वं प्रतिपाद्य तस्यैव पुनः "अमात्रश्चतुर्थो ऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोंकार आत्मैव" (मा. उ.) इत्यनेन ब्रह्मरूपत्वं प्रतिपादितम्। एवं मुण्डकेऽपि—

प्रणवो धनुः शरोह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्।। इति

इत्यत्र साधनारूपतयैवोंकारस्यनिर्देशः। ब्रह्मणोलक्ष्यतया जीवात्मनश्च शरस्त्वेनोल्लेखः। यथा शरः स्वकीयलक्ष्ये प्रविशति तथैव प्रत्यगात्मनः स्वकीयमौपाधिकं जैवरूपं परित्यज्य ब्रह्मणि प्रवेशोलयः ब्रह्मचैतन्यमात्ररूपेणैवावस्थानं निर्दिष्तम्। तत्र प्रमुखं साधनमोङ्कारः।

ओमित्येतदक्षरमुद्गीथमुपासीत" (छा.) इत्यत्र तु इति शब्दशिरस्क ओम्शब्दः प्रयुक्तोऽतोऽभिधायकत्वं परित्यज्योम्शब्देन ओमितिशब्दस्वरूपमात्रं विवक्ष्यते। यथा कस्यांचित् प्रतिमायां नार्मदे लिङ्गादौ व परमेश्वरस्योपासनं विधीयते तथैवात्रापि ओमित्यक्षरात्मकं उद्गीथशब्दवाच्ये परमात्मनो नामत्वेन प्रतीकत्वेनचोपासना विधीयते। कथमस्योद्गीथ शब्दवाच्यत्वामिति चेत्तत्राह भगवती श्रुतिरेवस्वयम् "ओमिति ह्युद्गायति" इति। ओम्इत्युच्चार्यैव उद्गाता उद्गायति उद्गानं सामगानं करोति। अत इदमक्षरमुद्गीथशब्दवाच्यम्। स्वयमप्योंकारो ब्रह्मात्मना-ऽऽधिष्ठितया साधनतया चोत्कृष्टतया गीयतेऽतोऽप्युद्गीथशब्दवाच्यता तस्य ।

उद्गीथविषयेऽस्ति विचारो ब्रह्मसूत्रशारभाष्यादौ। तथाहि "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्यत्रोङ्कारो-द्गीथशब्दयोः सामानाधिकरण्यं श्रूयते। तत्किम्"नामब्रह्म" इतिवदध्यासार्थम्, इत "यद्रजतं सा शुक्तिः " इति बाधार्थकम्, अथवा सत्यं ज्ञानम्" इतिवद् ऐक्यप्रतिपत्त्यर्थम्। आहोस्वित् नीलमुत्पलमितिवद् विशेष्यभावार्थम् इति संशयः।

तत्र पूर्वपक्षः चतुर्षु पक्षेषु अन्यतमनिर्धारणकारणाभावान्नास्ति कस्यचिदेकस्य यक्षस्य निश्चयः।

सिद्धान्तस्तु "व्याप्तेश्च समञ्जसम्" इत्यनेन सूत्रेण। तत्र चकारः अध्यास ऐक्यबाधपक्षत्रयनिषेधार्थः। एते त्रयः पक्षाःसावद्या। तथाहि नाक्षरोद्गीथयोः परस्परबुद्ध्यध्यासः "सिंहो माणवक इति वल्लक्षणाप्रसङ्गात्, फलाभावाच्च। न च "आपयिता" इति फलम्, तस्यान्यफलत्वात्। न च बाधपक्षः, अक्षरोद्गीथयोर्व्यावहारिक प्रमाणसिद्धत्वाद्रजतवदन्यतरस्य बाधाभावात्, फलाभावाच्च। न चैकत्वपक्षः—अपर्यायशब्दवाच्ययोरक्षरो-द्गीथयोरेकत्वाभावात्। पर्याययोश्च शब्दद्वयोच्चारणस्य निष्प्रयोजनत्वादन्यतरस्य वैयर्थ्यापातात्। तस्मादविशेषण

पक्ष एव निरवद्य:। व्याप्ते: ओंकारस्य सर्ववेदेषु व्याप्तत्वात् क ओंकार उपास्य इति जिज्ञासायां उद्‌गीथावयव ओंकार उपास्य इति उद्‌गीथमिति ओंकारस्य विशेषणामित्येव समञ्जसम्युक्तमित्यर्थ:।

अस्मिन्वर्णात्मके सर्वकर्माङ्गभूते उद्‌गीथे ओंकारे परमात्मप्रतीके परमात्मानमुपासति = परमात्मन उपासना करणीया इति निश्चयोतार्थ:। तस्याक्षरस्योपव्याख्यानम् = उपपादकं व्याख्यानम्त्रिधा ।

## छान्दोग्यस्योद्‌गीथोपासनायां विषयवस्तु

1– तस्योपव्याख्यानम् (प्रथमकण्डिकायाम्)

(1) एवमुपासनम् = एतद्‌गुणविशिष्टतया उपासनम्।

(क) रसतमत्वगुणविशिष्टतया–उपासनम्। "एषां भूतानां पृथिवी रस: " इत्यादिना। प्रथमं कारणे रसत्वव्यवहार:। तत: कार्येऽपि सारभूते "गोरस इतिवत्रसत्वव्यवहार:। उद्‌गीथ ओंकार: सर्वे षां रस: सारतरत्वात्।

(ख) समृद्धि (अनुज्ञा) गुणविशिष्टतया उपासनम्। "तद्वा एतदनुज्ञाक्षरम्" इत्यादिना। ओमिति–अनुज्ञार्थकमक्षरम्। कश्चिदयदि पृच्छेत् कुर्यामीश्वर स्मरणम्? तदा शिष्टेनानुमन्यते ओमिति। अनुज्ञैव समृद्धिरिति समृद्धिगुणविशिष्टतया उद्‌गीथोारस्योपासनम्।

(2) एवं विभूति एतादृशस्तुतिविशिष्टतया–उपासनम्।

(क) परम: = उत्कृष्ट:, परमात्मप्रतीकत्वात्

(ख) परार्ध्य: = परञ्च तदर्धञ्च परार्ध तदर्हतीति
परार्ध्य: = परमात्मस्थानार्ह: परमात्मवदुपास्यत्वात्।

(ग) तेनेयं त्रयी विद्या वर्तते। त्रयीविहितकर्मप्रवर्तकत्वस्तुतिविशिष्टतया उपासनम्। ओमित्युच्चार्य अध्यर्यु आश्रवयति, होता शंसति, उद्‌गाता उद्‌गायति।

ओंकारस्य परमात्मप्रतीकत्वात्तदीयस्तुत्या परमेश्वरस्यैवाराधनं जायते। स्वकर्मणा तमभ्यर्च्य" इति स्मृते: ।

(3) एवं फलम्–एतादृशफलकमुपासनम्।

(क) यजमानस्योपासकस्य कामानां आपयिता = प्रापयिता। अत: प्रापयितृत्वफलवदुपासनम्।

(ख) अन्ते च विद्याया = ज्ञानपूर्वकं श्रद्धया योगयुक्तेन कृतं कर्म वीर्यवत्तरं भवतीति अक्षरविज्ञानस्य फलम्।

**2**–अध्यात्मोपासनम् (द्वितीयकण्डिकायाम्)

(क) तस्यैवाक्षरस्य प्राणदृष्ट्याउपासनम्।

अत्र देवासुरसंग्रामाख्यायिका प्राणस्तुत्यर्था। तत्र द्योतनाद्देवाः शास्त्रानुमोदितकर्माणि प्रवर्तमाना इन्द्रिय-वृत्तयः। तदविपरीता असदवृत्तयोऽसुराः। कर्मज्ञानाधिकृतः पुरूष एव प्रजापतिः। स एव उक्थः। मुख्यप्राणात्मकस्याद्गीथस्योपासनेनैव विजयः। अतः मुख्यप्राणादृष्ट्या ओंकारस्योपासनम्।

**3**–अधिदैवतं = देवताविषयकमुद्गीथोङ्कारोपासनम्। (तृतीयकण्डिकायाम्)

तस्यैवक्षरस्य आदित्यदृष्ट्या उपासनम्। अङ्गेषूद्गीथादिषु आदित्यादिमतयः शिष्येरन्निति "आदित्यादिमतयश्चाङ्ग उपपत्तेः" इत्यादिसूत्रशाङ्करभाष्याभ्यां निर्णीतम्। तथा चादित्यादिदृष्ट्या उद्गीथोंकारस्योपासनम्।

**4**–अमृताभयगुणविशिष्टतया उद्गीथोंकारोपासनम् (चतुर्थकण्डिकायाम्)

अत्र विषयान्तरप्रसङ्गवारणार्थ पुनः पूर्वोक्तं प्रथमं श्रुति वाक्यं प्रदर्श्य देवानाममृतत्वमभयत्वञ्चोपवर्णितम्। तत्रामृतत्वाभयत्वगुणाविशिष्टतया उद्गीथोंकारस्योपासकोऽपि देववदमृतोऽभयो भवत्येव।

**5**–आदित्यदृष्ट्या प्राणदृष्ट्या च व्यस्तव्या उद्गीथोपासनम् (पञ्चमकण्डिकायाम्)

(क) आदित्यस्य रश्मिप्राधान्येन भेदगुणविशिष्टतया उद्गीथोंकारेपासनम्। अनेकपुत्रादिफलमवाप्य चैव निर्दिष्टम्।

(ख) भेदगुणविशिष्टतया प्राणदृष्ट्वा व्यस्ततया उद्गीथोपासनम्।

**6**–समस्तफलसम्पत्यर्थमुद्गीथोपासनम्। (षष्ठकण्डिकायाम्)

(क) पुत्राद्यैश्वर्याद्येकदेशविषयकोपासनान्तरं समस्तैश्वर्यादिफलकोद्गीथोपासनम्। यथा ऋचि पृथिवीदृष्टिः। साम्नि अग्निदृष्टिरित्यादि।

(ख) अङ्गोपासनं समाप्याधिदैविकीं प्रधानोपासनां विवक्षुः "य एषोऽन्तरादित्य" इत्यादिनाउपास्यस्वरूप-मुपन्यस्यति। अत्रादित्यमण्डलस्थः पुरुषः परमात्मा एव न संसारी इति "अन्तस्तद्धर्मोपदेशात्" इति सूत्रेणतदीयशाङ्करभाष्येण च संसाधितम्। अत उद्गीथोपासनया नित्यसिद्धः परमेश्वर एवोपास्यः।

**7**–तस्यौवाध्यात्मोपासनम्। (सप्तमकण्डिकायाम्)

अत्रापि ऋचि वाग्दृष्टिः साम्नि प्राणदृष्टिः इत्यादिद्वारा "य एषोऽन्तरक्षिणि पुरुषो दृश्यते" इत्यादिना परमेश्वरस्यौवोपास्यतया निर्देशः।

**8**–परोवरीयस्त्वगुणविशिष्टतया उपासनम् (अष्टमकण्डिकायाम्)

अत्र शिलक प्रवाहणदाल्भ्यसंवादमाश्रित्य तस्यैव परमेश्वरस्य अध्यात्माधिदैवतस्थानभेदावच्छिन्नपरमात्मदृष्ट्या उद्गीथोपासनं समाप्यस्थानभेदविच्छेदं हित्वा परोवरीयस्त्वादिगुणकपरमात्मदृष्ट्या उद्गीथोपासनम्-विहितम्।

**9**–तस्यौवकाशात्मना उपासनम्। (नवमकण्डिकायाम्)

अत्रापि परोवरीयस्त्वादिगुणविशिष्टस्य परमेश्वरस्याकाशात्मना उद्गीथोंकारोपासनम्। अत्रापि "आकाशस्तल्लिङ्गाद्" इति सूत्रेण तदीय शाङ्करभाष्येण चाकाशो नित्यसिद्ध: परमेश्वर एव न भूताकाश इति सिद्धान्तितम्। अत: परमेश्वर एवोपास्य:।

**10**–प्रस्ता वाद्युपासनोपक्रम: (दशमकण्डिकायाम्)

अत्रोषस्तिऋत्विग्संवादमाश्रित्य प्रस्तावाख्य सामोपासनस्योपक्रम:। उषस्तिआख्यायिकया प्रस्ताावदेवता-ज्ञानमाहात्म्यप्रदर्शनपुर: सरमुद्गीथोपासनम्।

**11**–प्रस्तावाद्युपासनम्। (एकादशकण्डिकायाम्)

अत्र चाक्रायणोषस्तिना सह राज्ञ: संवादादारभ्य उषस्तिप्रस्तोयादि संवादमाश्रित्यप्रस्तावोद्गीथ-प्रतिहारभागाना प्राणादित्यान्नदृष्ट्याउपासनम्। अत्रापि "अतएव प्राण" इति सूत्रेण तदीयशाङ्करभाष्येण च प्रस्तावदेवताया: प्राणस्य परमेश्वरत्वं संसाधितम्। अत: प्राणात्मना परमेश्वर एवोपास्य:।

**12**–शौवोद्गीथोपासनम्। (द्वादशकण्डिकायाम्)

अत्र शौव: = श्वमीर्दृष्ट उद्गीथो निर्दिष्ट:। तस्योपासनं बकग्लावसंवादादारब्धम्। बकग्लावयो: पुरत: श्वेत: श्वा प्रादुर्बभूव। स च श्वा न प्राकृत: श्वा, अपि तु कश्चिद्देव ऋषि र्वा तावनुगृहीतुं समक्षं तपोरूपस्थित:। एवमेवान्येऽपि श्वान: देवा: ऋषयो वा तत्रोपस्थिता: ततस्तै: सर्वैरूद्गीथमुद्गानं समारब्धम्। अत्र शुन आख्यायिकामालक्ष्य नान्यथाभावो विधेय:। अनुग्रहेकवपुष: परमेश्वरस्य केनापि रूपेणानुग्रहो भवितुमर्हति हितोपदेष्टृत्वात्तस्य।

**13**–स्तोभाक्षरेषु उद्गीथोपासनम् (त्रयोदशकण्डिकायाम्)

सामगानार्थ स्वरगीतिसिद्ध्यर्थ कानिचिदक्षराणि "हाउ हाई" इत्यादीनि त्रयोदशसंख्यकानि प्रयुज्यन्ते। तानि स्तोभपदवाच्यानि भवन्ति। तेष्वत्रोद्गीथोपासनम्विहितम्।

एवं संक्षेपत: छान्दोग्योक्तदिशाउद्गीथोंकारोपासनं प्रदर्शितम्। सर्वत्रापि मुख्यतयोपास्यं परं ब्रह्मैव। प्रोक्तोपासनेन चित्तशुद्धौ श्रवणादिसाधनेन स एव परमेश्वर: प्रसीदति, प्रकाशते च स्वयं हार्दाकाशे। तदनुग्रहेणाविद्यानिवृत्तौ चोपासको ब्रह्मात्मैक्यात्मकतत्साक्षात्कारभाग्भवति, मुक्तो भवतीति शिवम्।